# Shivaproktam Vriddhachaleshvarakshetre Shivopasakan Varnanam

# શિવપ્રોક્તં વૃદ્ધાચલેશ્વરક્ષેત્રે શિવોપાસકાન્ વર્ણનમ્

## Document Information

Text title : Shivaproktam Vriddhachaleshvarakshetre Shivopasakan Varnanam

File name : shivaproktaMvRRiddhAchaleshvarakShetreshivopAsakAnvarNanam.itx

Category : shiva, shivarahasya, raksha, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 23| 7-21.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં વૃદ્ધાચલેશ્વરક્ષેત્રે શિવોપાસકાન્ વર્ણનમ્

(શિવરહસ્યાન્તર્ગતે)

(શિવપાર્વતીસંવાદે)

પુરા કશ્યપકણ્વાદ્યાઃ શિવતીર્થાટનોત્સુકાઃ ।
શ્રીમદ્વૃદ્ધાચલં પ્રાપુર્દર્શનાદેવ મોક્ષદમ્ ॥ ૭॥

મણિમુક્તાનદીં દૃષ્ટ્વા કશ્યપાદ્યા મુનીશ્વરાઃ ।
તત્તીરે બિલ્વવૃક્ષાંશ્ચ દદૃશુર્નવપલ્લવાન્ ॥ ૮॥

તત્ર શૈવવરાંશ્ચાન્યાનપશ્યઞ્છિવપૂજકાન્ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગાન્ ત્રિપુણ્ડ્રાઙ્કિતમસ્તકાન્ ॥ ૯॥

રુદ્રાક્ષમાલાભરણાઞ્જટામણ્ડલમણ્ડિતાન્ ।
શઙ્કરેતિ મહેશેતિ શિવનામજપોત્સુકાન્ ॥ ૧૦॥

નિત્યમવ્યભિચારેણ મલ્લિઙ્ગાકાર્ચનપ્રિયાન્ ।
અદ્વૈતં પરમં બ્રહ્મ શિવ એવેતિ વાદિનઃ ॥ ૧૧॥

શ્રીમદ્રુદ્રજપાસક્તાન્પઞ્ચાક્ષરપરાયણાન્ ।
મણિમુક્તાનદીં પ્રાપુસ્તતસ્તે મુનિપુઙ્ગવાઃ ॥ ૧૨॥

તત્ર તે ચક્રિરે સ્નાનં મણિમુક્તાનદીજલે ।
ઉદ્ધૂલ્ય ભસ્મનાઙ્ગાનિ તતસ્તે મુનિપુઙ્ગવાઃ ॥ ૧૩॥

ત્રિપુણ્ડ્રધારણં ચક્રુસ્તતસ્તે કશ્યપાદયઃ ।
અથ સમ્પૂજયામાસુઃ શિવં માં લિઙ્ગરૂપિણમ્ ॥ ૧૪॥

તતઃ સર્વૈર્મુનિવરૈર્જપ્તં પઞ્ચાક્ષરં શિવે ।
તતસ્તે બિલ્વપત્રાણિ મણિમુક્તાજલાનિ ચ ॥ ૧૫॥

ગૃહીત્વા મૌનમાસાદ્ય જગ્મુર્વૃદ્ધાચલેશ્વરમ્ ।
તતો દૃષ્ટ્વા મુનીન્દ્રાસ્તે શ્રીમદ્વૃદ્ધાચલેશ્વરમ્ ॥ ૧૬॥

સન્તોષં પરમં જગ્મુરાનન્દભરિતા ભૃશમ્ ।
તતઃ સમ્પૂજયામાસુઃ શ્રીમદ્વૃદ્ધાચલેશ્વરમ્ ॥ ૧૭॥

રુદ્રસૂક્તૈર્લિઙ્ગરૂપમભિષિચ્ય યથાક્રમમ્ ।
પ્રદક્ષિણનમસ્કારાંસ્તતશ્ચક્રુર્મુનીશ્વરાઃ ॥ ૧૮॥

તતઃ સ્તુત્વાતિભક્ત્યા તે શિવનામજપોત્સુકાઃ ।
પઞ્ચાક્ષરજપં કૃત્વા શ્રૌતન્યાસપુરઃસરમ્ ॥ ૧૯॥

શ્રીમદ્રુદ્રજપં કૃત્વા તત્ર તસ્થુરચઞ્ચલાઃ ।
તદાનીમાગતો દેવિ ગૌતમોઽપ્યરુણાચલાત્ ॥ ૨૦॥

અગસ્ત્યઃ પૂજયામાસ શ્રીમદ્વૃદ્ધાચલેશ્વરમ્ ।
તતસ્તુષ્ટાવં શુદ્ધાત્મા ગૌતમો મામુમાપતિમ્ ॥ ૨૧॥

શૈવવર્યેષુ શૃણ્વત્સુ શ્રોત્રાનન્દકરં શિવે ।

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં વૃદ્ધાચલેશ્વરક્ષેત્રે શિવોપાસકાન્ વર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૩। ૭-૨૧.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 23 . 7-21.1..

Notes:

Śiva શિવ continues to tell Pārvatī પાર્વતી about the Vṛddhācālakṣetra વૃદ્ધાચલક્ષેત્ર and the River MaṇiMuktā મણિમુક્તા where several Munī-s મુનિ and Ṛṣi-sઋષિ including Kaśyapā કશ્યપ, Kaṇva કણ્વ, Agastya અગસ્ત્ય and Gautama ગૌતમ visited and performed worship of Vṛddhācaleshvara Śivaliṅga વૃદ્ધાચલેશ્વર શિવલિઙ્ગ in several ways including - observing Silence, proclaiming Śiva શિવ as Advaita Paramabrahama અદ્વૈત પરમબ્રહ્મ, offering Bilvapatra બિલ્વપત્ર, ŚrīmadRudraJapa શ્રીમદ્રુદ્રજપ, reciting Rudrasūktam રુદ્રસૂક્તમ્ and Pañcākṣarī mantra પઞ્ચાક્ષરી મન્ત્ર - while being adorned with Bhasma ભસ્મ, Rudrākṣa રુદ્રાક્ષ and Tripuṇḍra ત્રિપુણ્ડ્ર.

Proofread by Ruma Dewan

*Shivaproktam Vriddhachaleshvarakshetre Shivopasakan Varnanam*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*